CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 904

Title Taṭāṭukā stotra.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 904 Subject: Stotra.

Title: Taṭāṭakā stotra.

Author: – Scribe: –

Date of the work: Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 7.6" by 4.2" Extent: 6 foll (no. 1 missing)

Language: Sanskrit Script: Devanāgarī

Remarks: Begins abruptly.

खर्जूरैर्बिजपूरकैः ॥ चंदनागरुवृंदैश्च देवदारुमहाद्रुमैः ॥ ७ ॥ अन्यैर्नानाविधैर्वृ
क्षैः सदापुष्पफलद्रुमैः ॥ जातिचंपकपुन्नागबकुलैः करवीरकैः ॥ ८ ॥ कपित्थवि
ल्वधात्र्यादिद्रुमैश्चोपशोभितं ॥ सौवर्णपद्मनीनाम्ना तत्रचास्ति सरोवरं ॥ ९ ॥
मंदारपारिजातादिनीरजैः कुसुमपादपैः ॥ शोभितं परमात्कल्पा दिव्यपुष्पफलो
द्रुमैः ॥ १० ॥ तस्यपश्चिमभागेच नानाकल्पद्रुमांतरे ॥ चिंतामणिगृहं दिव्यं चिंति
तार्थफलप्रदं ॥ ११ ॥ अनेकरत्नरचितैर्नानाचित्रैश्च शोभितं ॥ चिंतामणिगृहं दि
व्यं चिंतार्थफलं रत्नस्तंभसहस्रैस्तु रचितं विश्वकर्मणा ॥ १२ ॥ सर्वतो विपुलं रम्यं स
हस्रादित्यभास्वरं ॥ तन्मध्ये पुष्पकं दिव्यं विमानमतिभास्वरं ॥ १३ ॥ तत्र सिंहासने

वरंनवरत्नविनिर्मितं॥ सिंहकोटिसहस्रैस्तु धृतं परमभास्वरं॥१३॥ तस्योपरिम
हापीठं श्रीपीठं श्रीकरं महत्॥ तस्य चक्रस्य मध्ये तु तरुणार्कसमप्रभं॥१४॥ श्री
मदष्टदलं पद्मं तप्तकांचनसन्निभं॥ तस्योपरि समासीनं श्रीमत्सुंदरनायकं
॥१५॥ कोटिकंदर्पलावण्यं कोमलावयवोज्ज्वलं॥ अनर्घ्यरत्नखचितकिरीटे
नविराजितं॥१६॥ रत्नकुंडलसंवल्गत्कपोलमकरोज्ज्वलं॥ पूर्णचंद्राननवदनं
त्रिनेत्रं चंद्रशेखरं॥१७॥ ग्रैवेयहारकटककटिसूत्रैरलंकृतं॥ जातिचंपकपुन्ना
गदिव्यमालैरलंकृतं॥१५॥ चतुर्भुजमुदारांगं पीतकौशेयवाससं॥१८॥ चंदना
गरुकस्तूरीकर्पूरैश्च विलेपितं॥ जातिचंपकपुन्नागदिव्यमालैरलंकृतं॥१९॥ २

अनुपमगुणोपेतं मदखंडानंदविग्रहं॥ सदाशिवं परं तत्त्वं साक्षात्परमकारणं॥
॥२०॥ मूललिंगमहालिंगं केचिद्वालास्यसुंदरं॥ कर्पूरसुंदरं केचित् कदंब
वनसुंदरं॥२१॥ कल्याणसुंदरं चाभिषेकसुंदरमप्यपि॥ पुनरन्ये मृगमदसुं
दरं सोमसुंदरं॥२२॥ समष्टिविद्यानगरीनायकं मधुराधिपं॥ कन्यकानग
रीनाथं चतुःकोटपुरीश्वरं॥२३॥ इहलोकशिवलोकेशं जन्मुक्तिपुरीश्वरं॥ ए
वमाद्यैर्नामधेयैः स्तुवंति मुनिपुंगवाः॥२४॥ कदंबवनराजानं सार्थकैवल्य
दायकं कोटिसूर्यप्रतीकाशं त्रिनेत्रं चंद्रशेखरं॥२५॥ शूलटंकगदाचक्रकुंत
पाशधरं विभुं॥ वरदाभयहस्तं च सर्वविषयवशीकृतं॥२६॥ एवंध्यात्वा महादे

वं श्रद्धानक्तिसमन्वितः॥ नमस्तेदेवदेवेशनमस्तेजगतांपते॥ नमस्तेचेंद्रचू
डायनमस्तेशूलपाणिने॥२७॥ नमस्तेबालकालायनमस्त्रैलोक्यधारिणे॥
नमस्तेवेदवेद्यायनमस्तेपुण्यमूर्त्तये॥२८॥ नमस्तेब्रह्मरूपायनमस्तेवि
ष्णुमूर्त्तये॥ नमस्तेरुद्ररूपायनमोईश्वररूपिणे॥२९॥ नमःसदाशिवाय
पिनमःपरशिवायच॥ नमोदेवायमहतेमंगलायमहात्मने॥३०॥ नमःपर्व
तराजेंद्रकन्यकापतयेनमः॥ नमस्तेरुद्रभगवन्भन्यवेचेषवेनमः॥३१॥ न
मस्तेधन्विनेतुभ्यंनमस्तेपरमात्मने॥ नमःशिवायत्रिदशार्चितायविनष्ट
दोषायगुणार्णवाय॥ विमुक्तिमार्गप्रतिबोधनायदेवादिदेवायनमःशिवा

य॥१॥ तस्यांकमध्यमासीनांरूपाम्नांचारफरलोचनां॥ परापरमयींदेवींपरमा
नंदविग्रहां॥३३॥ शक्तिमग्र्यांशिवमयींसच्चिदानंदविग्रहां॥ शिवस्यानंद
नन्दरंजगन्मोहनरूपिणीं॥३४॥ जगदुत्पत्तिसंहाररक्षणैकपरायणां॥
हिमांशुरूपामलाकारांजगन्मोहनरूपिणीं॥३॥ हिमवद्वंदनिषेवितां॥३५॥ अव्या
नफुल्लकह्लारविराजितकरांबुजां॥ किरीटरत्नग्रैवेयकुंडलैर्मंडिताननां॥
॥३६॥ पूर्णचंद्राननवदनांस्फुरदिंदीवरेक्षणां॥ बालार्ककोटिसंकाशांचंद्र
सुशीतलां॥३७॥ कस्तूरीतिलकोपेतफालपट्टविराजितां॥ पिनाकीधनुरा
कारांरंजितभ्रूलतांतरां॥३८॥ स्थूलमुक्ताफलोपेतनासाभरणशोभितां॥

दर्पणस्वच्छसच्छायकपोलफलकोज्ज्वलां ॥ ३९ ॥ ताम्रविद्रुमबिंबोष्टी कुंदेंदु
दशनप्रभां ॥ चिबुकोद्देशशोभाढ्यां चंद्ररेखावतंसिनीं ॥ ४० ॥ ग्रैवेयहारकटक
केयूरवलयांगदैः ॥ भूषितां भूषणैरन्यैर्मणिसंयुतां ॥ ४१ ॥ पीतांबरध
रां पीतकौशेयोत्तरधारिणीं ॥ अनिशं भ्रामणे तुंगस्निग्धपीनपयोधरां ॥ चं
दनागुरुकस्तूरीकर्पूरेणाथकुंकुमैः ॥ ४२ ॥ लेपितां दिव्यकुसुमैः दिव्यमालैर
लंकृतां ॥ कांचीकपालसंयुक्तकटिसूत्रोपशोभितां ॥ ४३ ॥ नमध्यां च युश्रो
णीं नवहारकभूषितां ॥ मणिनूपुरशोभाढ्यपादपद्मविराजितां ॥ ४४ ॥ ब्रह्म
विष्णुशिवोरत्ननीराजितपदांबुजां ॥ एवं ध्यात्वा महादेवीं नमस्कुर्यान्ने दा मुने ॥

सर्वावयवसंपूर्णां सर्वाभरणभूषितां ॥ ४५ ॥ सर्वेषां नागपनिलयां सो नागपवर
दायिनीं ॥ एवं ध्यात्वा महादेवीं नमस्कुर्यात्सदा मुने ॥ ४६ ॥ मथुराधीशदयिते दि
मथुरापुरनायिके ॥ महालक्ष्मी नमस्तेस्तु मायातीते मनोहरे ॥ ४७ ॥ मलय
ध्वजपांड्यस्य कन्यके कमलेक्षणे ॥ नटनाकी महादेवी ताटंकिनि नमोस्तु ते ॥
॥ ४८ ॥ नीपकाननिलये निसकन्यापरिसेविते ॥ नित्यैश्वर्यप्रदे देवि नमस्त्रि
पुरवासिनि ॥ ४९ ॥ नैवेद्यं त्रिपुराधीशे श्रीमहात्रिपुरसुंदरि ॥ विद्यामारोग्यमैश्व
र्यं देहि मे चिरालये ॥ ५० ॥ त्रिगुणे त्रिगुणातीते त्रिगुणात्मकसेविते ॥ त्रयीमयी
नमस्तेस्तु नित्यं त्रिपुरभैरवि ॥ ५१ ॥ चिंतामणिगृहावासे नित्यं चिंतितदायिके ॥

नमस्ते देवि मीनाक्षि नारायणसहोदरि ॥ सदाशिवांकनिलये सदा सिद्धनिषेवि
ते ॥ ५२ ॥ सदसद्भाववर्हिते नमः शफरलोचने ॥ कांचीपुरवराधीशे कांचीनूपुर
शोभिते ॥ ५३ ॥ कामाक्षि करुणापांगे कामकोटि नमोस्तु ते ॥ श्यामले श्यामला
कारे श्यामलीपाटविस्थिते ॥ ५४ ॥ श्रियं देहि य[illegible]देहि कीर्त्तिमा सुखं पुत्त्वया सुखं
॥ मधुरे मधुरालापे मधुरापुरनायिके ॥ ५५ ॥ मलयध्वजकन्ये त्वं घ्रमीदपरमेश्व
रि ॥ श्रीसुंदरेशदयिते श्रीमहात्रिपुरेश्वरि ॥ ५६ ॥ रत्नमामनीशं देवि दास्त्वाय
णि नमोस्तु ते ॥ सर्वमंगलमांगल्ये सर्वेश्वरि सदाम्बिके ॥ ५७ ॥ आरोग्यमायुरैश्व
र्यं इष्टसिद्धिं च देहि मे ॥ समस्तदेवकृत्देवैः स्तूयमानपदांबुजे ॥ ५८ ॥ देहि मे नति ५

रुचलां त्वत्पादयुगलांबुजे ॥ इदं त्रिपुरनैरस्त्या मीनाक्ष्या ध्यानवैभवं ॥ अगस्त्या
य पुरा प्रोक्तं स्तोत्रं व्यर्थफलप्रदं ॥ ५९ ॥ यः पठेन्मस्तुया द्वापि स जीवन्मुक्ति
नाप्नुवेत् ॥ सकृत् ध्यानेन सर्पकोटिजन्माघनाशनं ॥ ६० ॥ त्रिसंध्यं श्रद्धया
नित्यं षण्मासं तु नुसंधिं तिष्ठे ॥ स सर्वैश्वर्य[illegible]लपं लभते नात्र संशयः ॥
॥ ६१ ॥ यावज्जीवं पठेद्यस्तु त्रिसंध्यं श्रद्धया[illegible]नः ॥ स तु स्कासकलान् भो
गान् ते शिवपदं व्रजेत् ॥ ६२ ॥ ॥ इत्यागस्त्यसंहितायां ईश्वरागस्त्यसंवादे त
ग्रन्तका स्तोत्रं नाम चतुरशीतितमोध्यायः ॥ ॥ हरिपुरंदर भक्त ति देवतामुक
टविस्फुरत्किरणनाम्बंनमतसंततंनमनसंततंत्रिपुरसुंदरीचरणपंकजं ॥ १ ॥